International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2019; 5(4): 319-323
© 2019 IJSR
www.anantaajournal.com
Received: 01-05-2019
Accepted: 04-06-2019

**साधुः अक्षरमुनिदासः**

शोधच्छात्रः, करनाटक-संस्कृत-विश्वविद्यालयः, बेंगळूरु, कर्नाटक, भारत

**Correspondence**
**साधुः अक्षरमुनिदासः**

शोधच्छात्रः, करनाटक-संस्कृत-विश्वविद्यालयः, बेंगळूरु, कर्नाटक, भारत

# ब्रह्मसूत्रसाधनाध्यायस्य गीतया सह तुलनात्मकमध्ययनम्

**साधुः अक्षरमुनिदासः**

**सारांश**

महर्षिबादरायणविरचितब्रह्मसूत्रेषु चत्वारः अध्यायाः विलसन्ति । तत्र तृतीयाध्यायः साधनाध्याय इति नाम्ना प्रथते । यतः अत्र मोक्षसाधनस्वरूपादिनिष्कर्षः क्रियते । भगवद्गीतायामपि मोक्षसाधनस्वरूपादिविचारः विस्तरेण कृतः दृश्यते । अस्मिन् लेखे उभयोः तुलनात्ममध्ययनम् चिकीर्षितम् ।

**कू टशब्दः** प्रस्थानम्, साधनम्, ब्रह्म, जीवः, मोक्षः, भक्तिः, उत्क्रान्तिः इत्यादयः

## प्रस्तावना

सामान्यतः एकस्मिन् प्रस्थाने वर्तमानाः तस्मिन्नेव सीम्नि स्थिताः अन्यत्प्रस्थानं प्रति निमीलिताक्षाः तत्त्वमणिं न विन्दन्त इति स्थितिः । अतः सर्वेषां प्रस्थानानां चिन्तने इतरसर्वेषामपि प्रस्थानानां समवेक्षणं न्याय्यमिति यथार्थस्थितिः । कस्मिन्नपि सिद्धान्ते मास्माकं भरः । परन्तु प्रस्थानान्यतमे गीता-सूत्रे विना विरोधेन कथं संवलिते स्यातामिति चिन्तने प्रवृत्ते फलितोऽयममंशः । यदि तर्हि प्रस्थानत्रये नीचोत्तमव्यवस्था भवेत् । द्वयोर्विरोधे कतरदुत्तममिति निर्णेतुं कथं प्रभवामहे ? यद्यस्ति सूत्रं तत्किं प्रमाणम् इत्येवमाद्यनवस्था परस्पराश्रयो वा मतिं बाधते । यदि विवक्षाभेदेन सङ्गमनं तर्हि कतरद्बलीयो भवति इत्यादिप्रश्नाः वर्तन्ते । तत्समाधानाय सूत्रं निर्णायकत्वेन स्वीकृत्य सर्वसच्छास्त्रमीमांसामूलं द्रष्टव्यं भवति । प्रसङ्गागतश्च किमप्यन्यत् इति ।तथा च भगवद्गीतायां मतत्रयेषु निरूपितविवरणस्य तस्यैव सूत्रप्रस्थाने मतत्रयरीत्या निरूपितस्य च संगमः अस्ति वा, अस्ति चेत् तत् कथं इति निरूपणार्थोऽयं प्रयत्नः ।।

**गीतायां सूत्रप्रतिफलनम्**

गीतायां प्रथमतः देहात्मभेदं दृढं प्रतिपादयति भगवान् श्रीकृष्णः । तदेव साधनम् । अन्यथा साधनमेव न सङ्गच्छते । भारतीयेतरधर्मेषु लौकिकानामेव विषयाणां प्राधान्यात् देहात्मभेदः नोक्तः । यद्यपि - झण्डा अवेस्ता नामके पारसिकानां ग्रन्थे –

> "All is not lost when death takes place. For death is not the end of life." [1]

इत्यादिषूक्तः देहात्मभेदः । तथापि भारतीयानां तत्त्वशास्त्रात् प्रभावितोऽयम् इति अस्माभिः ज्ञायते । यतो हि, वैदिका इव पारसिका अपि अग्निं सूर्यञ्च अतितरां पूजयन्ति । अग्नेः शुचित्वायैव पृथिव्याश्च नैर्मल्याय शवान् न भूमौ क्षिपन्ति न दहन्ति वा । परन्तु बैबल् ग्रन्थे वा कुरान् ग्रन्थे वा देहात्मभेदः न प्रतिपादितः ।

भगवद्गीतायान्तु –

> न जायते म्रियते वा कदाचित् नायं भूत्वा भविता वा न भूयः ।
> अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे ॥ [2]

**भागवते च एकादशस्कन्धे, एकादशाध्याये -**

> देहस्थो न च देहस्थः विद्वान् स्वप्नात् यथोत्थितः ।
> अदेहस्थोऽपि देहस्थः कुमतिः स्वप्नदृग् यथा ॥ [3]

इति देहात्मभेदप्रतिपादकः श्लोकः वर्तते । श्लोकेऽस्मिन् पुनरुक्तमिव प्रतीयते । न जायते इति प्रथमपादे, अजः इति तृतीयपादे । न म्रियते इति प्रथमे । नित्यः इति तृतीये । न कदाचित् जायते म्रियते इति शाश्वतत्वमेवाह । न भूत्वा भविता इति पुराणत्वम् इति ।

**अत्र श्रीशङ्कराचार्यः व्याख्याति -**

> "न जायते = न उत्पद्यते । जनिलक्षणा वसुविक्रिया आत्मनो न विद्यते इति । तथा न म्रियते वा । वा शब्दः चार्थे । न म्रियते च इति । अन्त्या विनाशलक्षणा विक्रिया प्रतिषिध्यते कदाचिच्छब्दः सर्वविक्रिया प्रतिषेधैः सम्बध्यते यस्मान्नायम् आत्मा । भूत्वा भवनक्रियाम् अनुभूय पश्चात् अभाविता - अभावं गन्ता न पुनः तस्मात् न म्रियते । यो हि भूत्वा न भविता स म्रियते इत्युच्यते लोके । अतो न जायते यस्मादेवं तस्मादजः । यस्मान्नम्रियते तस्मान्नित्यश्च " इति ।

**अस्य विमर्शः एवं भवत -**

प्रथमस्य पादद्वयस्य विवरणं, तृतीयतुरीयौ पादौ कुरुतः इति तन्मतम् ।

भगवद्रामानुजस्तु शाङ्करमेव पन्थानम् अनुसरति । मध्वस्तु अयं जीवोऽपि अजः नित्यश्च, अन्यथा पुनरुक्तेः । शाश्वतश्च न कदाचित् अस्वातन्त्र्यादिकं जीवस्वरूपं जहाति ।

**महाविष्णुपुराणे –**

> अल्पशक्तिरसार्वज्ञं पारतन्त्र्यमपूर्णता ।
> उपजीवकत्वं जीवत्वं ईशत्वं तद्विपर्ययः ॥
> स्वाभाविकं तयोरेव नान्यथा स्यात् कथञ्चन ।
> वदन्ति शाश्वतावेतौ अत एव महाजनाः ॥ इति प्रोक्तम् ।

शाश्वतत्वं नाम शश्वदेकप्रकारतया वर्तित्वं प्रतिपादितम् । अन्यथा कथं सङ्गच्छते शाश्वतत्वम् । जीवस्य ब्रह्मभावे जीवत्वमनित्यं भवति । शाश्वतत्वं नोपपद्यते । यदि ब्रह्म जीवो जायते पुराणत्वं गतं भवति । यतो हि, स्वपुरातनत्वं ब्रह्म नाशयति जीवभावेन ।

अथ च पुराण इत्यस्य हनूमत्पैशाचरीत्या सदैकरूप इत्यर्थो भवति । तदा पुनरुक्तं भवति ।

रामानुजमतरीत्या पुराणशब्दस्य सर्वथा अपूर्ववत् अनुभाव्य इत्यर्थोऽपि नातीवसङ्गतः । यतः अर्थोऽयं स्याद्वादोन्नीत इति वा भाति । अयं तु आत्मा निरवयवत्वात् न वा एवेति पुराणः । न वर्धत इत्यर्थः इति चेत् शाङ्करं तदपि नातीव सङ्गच्छते । मोक्षेऽपि सावयवभोगः ब्रह्मसूत्रे उपनिषत्सु च स्पष्टः । न हन्यते हन्यमाने शरीरे इति विस्पष्टं देहात्मभेदमाह -

अन्तवन्त इमे देहाः नित्यस्योक्ता शरीरिणः ।
अनाशिनोऽप्रमेयस्य तस्माद्युध्यस्व भारत ॥ [4]

इमे देहाः इति शरीरात्मभेदवतः जीवस्य शरीरात्माऽभेदवतः परमात्मनश्च भेदः स्पष्टः ।

तस्माद्युध्यस्व इत्यत्र यस्मादेवं नित्यम् अविक्रियश्च आत्मा तस्माद्युध्यस्व युात् उपरमं माकार्षी इत्यर्थः । नहि अत्र युद्धकर्तव्यता विधीयते । युद्धे प्रवृत्त एव हि असौ शोकमोहप्रतिबद्धः तूष्णीमास्ते । अतः तस्य कर्तव्यप्रतिबन्धापनयनमात्रं भगवता क्रियते । तस्मात् युध्यस्व इति अनुवादमात्रं न विधिः ।

रामानुजभाष्ये तु तस्मात् देहस्य विनाश्यस्वभाववत्वात् आत्मनो नित्यस्वभाववत्वात् उभावपि न शोकस्थानमिति शस्त्रपातादिपरुषस्पर्शानवर्जनीयान् स्वगतान्यगतांश्च धैर्येण अमृतत्वप्राप्तये अनभिसंहितफलं युद्धाख्यं कर्मारम्भस्व इति ।

मध्वस्तु गीतातात्पर्ये- अनिच्छया देहहान्यादेरेव दुःखप्राप्तिः सिद्धा । तस्मात् अनाशिनोऽप्रमेयस्य विष्णोः पूजार्थं युध्यस्व, तत्प्रसादाधीनत्वाद् दुःखनिवृत्तेः सुखस्य च । आत्मनः नित्यत्वम् अविक्रियत्वं च युद्धे कथं हेतू भवतः । अत एव युध्यस्व इति यद्वर्तते तद्वात्कारेण अनुवादरूपमित्याह । अतः नातीव सङ्गतमिदं भाष्यम् । विनाशस्वभावात्- युध्यस्वेति रामानुजोऽपि असमीचीनमाह । शतवर्षानन्तरं मरिष्यस्येवेति किं दिनत्रयानन्तरमेव म्रियस्व इति उक्तमिव भवति । अतः युद्धे न तत् समीचीनहेतुत्वं भजते ।

माध्वभाष्ये तु गीतायाः समीचीना आनन्तर्यसङ्गतिः स्फुटमभिव्यक्ता भवति । यदि शङ्कररीत्या कृष्णोक्तिः भवेत् तर्हि अन्तवन्त इमे देहाः इत्यनेन अथचैनं नित्यजातमिति इदं गतार्थं भवति । जातस्य ध्रुवं मृत्युरिति, अव्यक्तादीनि भूतानीति च इमौ श्लोकौ गतार्थौ भवतः । देही नित्यमवध्योऽयम् इतीदमपि गतार्थत्वं भजते । अत्र देहहान्यादिः दुःखाधायकः इति अनुभवसिद्धः । अतः न कोऽपि इच्छया देहं धरते । अनिच्छयैव देही भवति । अतः अनाशिनम् अप्रमेयं देवमेव सम्पूज्य तथैव समुपास्य मुक्तो भवति इति ज्ञायते । अत एव नित्यस्य इत्युक्तेऽपि अनाशिन इत्यनेन न पुनरुक्तिः । नित्यपदं शरीरिविशेषणम्, अनाशिपदं परमात्मविशेषणमिति सङ्गतं भवति । न त्वेवाहम् इत्यारभ्य देही नित्यमवध्योऽयम् इत्यन्तं- देहात्मैक्यं कृष्णः विस्तरेण निराकरोति । कुत इति चेत् देहदेहिभेदज्ञानमेव साधने कारणं सङ्गच्छते । ब्रह्मसूत्रेषु चतुर्भिरेव सूत्रैः देहदेहिभेदः भण्यते ।

कृष्णोक्तिः स्वधर्मविमुखम् अर्जुनं धर्माभिमुखीकरणाय प्रवृत्ता । विशेषतः क्षत्रधर्मे प्रेरयितुम् । हत्या च देहस्यैव नात्मनः इति वक्तुम् । व्यासोक्तिस्तु ज्ञानेन सह प्रवृत्यर्थं इन्द्रियवितरणव्यवस्थोपपत्यर्थम् इन्द्रियेषु पञ्चभूतभागव्यवस्थोपपत्यर्थं प्रवृत्ता इति सङ्गच्छेत ।

तथाहि –ब्रह्मसूत्रे तृतीयाध्याये अवतरणिकाभाष्यगमनिका मतत्रयरीत्यैवं वर्तते ।

रामानुजभाष्ये तु तृतीयाध्यायस्य संगतिरेवं निरूपिता - अतिक्रान्ताध्याये निखिजगदेककारणं निरस्तनिखिलदोषगन्धम्, अपरिमितोदारगुणसागरं, सकलेतरविलक्षणं परं ब्रह्म मुमुक्षुभिरुपास्यतया वेदान्ताः प्रतिपादयन्तीत्ययमर्थः स्मृतिन्यायविरोधपरिहारपरपक्षप्रतिक्षेपवेदान्तवाक्यपरस्पर- विरोधपरिहाररूपकार्यस्वरूपसंशोधनैः तद्दर्शनत्वहेतुभिः सह

स्थापितः । अतः अध्यायद्वयेन ब्रह्मस्वरूपं प्रतीपादितम् । इतरेण इदानीं तत्प्राप्त्युपायैः सह प्राप्तिप्रकारः चिन्तयितुमिष्यते । तत्र तृतीयाध्याये उपायभूतोपासनविषयचिन्ता वर्तते । इति ।।

माध्वभाष्ये तु साधनविचारोऽयमध्यायः इति ।

तत्राध्याये पादसङ्गतिः शाङ्करे एवमुच्यते । तत्र प्रथमे तावत्पादे पञ्चाग्निविद्यामाश्रित्य संसारगतिप्रभेदः प्रदश्र्यते वैराग्यहेतोः । तस्माज्जुगुप्सेत इति च अन्ते श्रवणात् ।

रामानुजभाष्ये तु उपासनारम्भाभ्यर्हितोपायश्च प्राप्यवस्तुव्यतिरिक्तवैतृष्ण्यं, प्राप्यतृष्णाचेति, तत् सिध्यर्थं जीवस्य लोकान्तरेषु सञ्चरतः जाग्रतः स्वपतः सुषुप्तस्य मूर्च्छतश्च दोषाः, परस्य च ब्रह्मणो तद्रहिततया कल्याणगुणाकरत्वञ्च प्रथमद्वितीययोः पादयोः प्रतिपाद्यते ।

माध्वभाष्ये तु वैराग्यार्थे गत्यादिनिरूपणा प्रथमपादेछ्व इति । तृतीयाध्यायं प्रति पूर्वपक्षः शाङ्करभाष्यरीत्या एवं वर्तते- जीवः मुख्यप्राणसचिवः सेन्द्रियः समनस्कः अविद्याकर्मपूर्वप्रज्ञापरिग्रहः पूर्वदेहं विहाय देहान्तरं प्रतिपद्यत इति एतदवगतम् । स किं देहः बीजैः भूतसूक्ष्मैः सम्परिष्वक्तः गच्छति, आहोस्वित् असम्परिष्वक्तः इति चिन्त्यते ।

रामानुजाचार्यमतेन पूर्वपक्षः एवं भवति । तत्र देहाद्देहान्तरं गच्छन् अयं जीवः देहान्तरारम्भहेतुभिः भूतसूक्ष्मैः सम्परिष्वक्तः एव गच्छति उत न इति चिन्तायां- यत्र यत्र जीवो याति तत्र तत्र भूतसूक्ष्माणां सुभत्वात् असम्परिष्वक्तो यातीति प्राप्तम् इति ।

माध्वे तु भूतबन्धो हि बन्धः भूतबन्धस्तु संसारः मुक्तिस्तेभ्यो विमोचनम् इति वाराहे । तच्च मरणे भवति । भूतानां विनिवृत्तिस्तु मरणं समुदाहृतम् । भूतानां सम्प्रयोगश्च जनिरित्युच्यते बुधैः इति भारते । अतः किं साधनैरित्यत आह इति ।अत्र एवं विमर्शः क्रियते ।

भूतसम्परिष्वक्तो वा भूतासम्परिष्वक्तो वा गच्छति चेत् तथा गमनं किमर्थं पूर्वपक्षितं भवति इत्युक्ते तन्माध्वेन स्फुटीभवति । तथा पूर्वपक्षे अयमभिप्रायो भवति- अस्ति ब्रह्म मुक्तिदातृ इति यदुदितं तन्मोघम् । कुत इति चेत् स्वयमेव जीवः मुक्तो भवति बो भवति न परमात्मनस्तत्र हस्तक्षेपः । मरणे मुक्तिः । जनौ बन्धनम् । अतः किं साधनैः इति समग्रस्य साधनाध्यायस्य पूर्वपक्षोत्थापकं भाष्यं माध्वं भवति । अतः अनेनैव भाष्येण स्फुटं भवति ।

प्रथमपादे प्रथमाधिकरणे शाङ्करमतरीत्या सप्तसूत्राणि भवन्ति रामानुजमतरीत्या च । मध्वरीत्या च अष्टौ सूत्राणि भवन्ति । कृतात्यये अनुशयवान् दृष्टस्मृतिभ्याम् इत्यपि सूत्रं- प्रथमाधिकरणगतमेव भवति । शाङ्करमतरीत्या अस्य सूत्रजातस्य एवमर्थः- देहान्तरप्रतिपत्तौ देहबीजैः भूतसूक्ष्मैः सम्परिष्वक्तः रंहति गच्छति । छान्दोग्यगत-पञ्चाग्निप्रश्ननिरूपणाभ्यां ज्ञायते । अपां बाहुल्यात् आपः इति पुरुषाणां नामान्तरं पुरुषस्य देहान्तरप्रतिपत्तौ प्राणानामपि गतिः वेदेषु दृश्यते । मरणको वागादयः प्राणाः अग्न्यादीन् देवान् गच्छन्ति इति चेत् न वागादीनाम् अग्न्यादिगतिश्रुतिः गौणी । प्राणानां जीवेन सह अन्यत्र गमनं मुख्यम् । प्रथमे अग्नौ अपां श्रवणं नास्ति इति चेत् न तत्र आपः हौम्यद्रव्यतया श्रुताः । प्रथमे अग्नौ ता एव आपः श्राशब्देनोच्यन्ते । आपः श्रादिक्रमेण पञ्चम्याम् आहुतौ पुरुषाकारं प्रतिपद्येरन् अश्रुतत्वात् इति चेन्न, इष्टादिकारिणां धूमादिना पितृमानेन तथा चन्द्रप्राप्तिं कथयति इष्टादिकारिणां देवैः सह संवसतां भोगप्राप्तिं श्रुतिः दर्शयति । तस्मात् जीवः भूतसम्परिष्वक्तः गच्छति इति शाङ्करमतरीत्या अधिकरणसारः ।

**रामानुजमतरीत्या -**

तदनन्तरप्रतिपत्तौ देहान्तरगमने भूतसूक्ष्मैः सहितः जीवः गच्छति इति पञ्चाग्निविषयक प्रश्ननिरूपणाभ्यां तत्प्रतीयते । आपः पुरुषवचसः भवन्ति इति यदुक्तं- तत् त्रिवृत्करणात् । उत्क्रामति जीवे प्राणानामनुगतिः वेदे प्रसिद्धा । प्राणानां जीवस्य मरणको अग्न्यादिषु आश्रयश्रवणात् जीवः सम्परिष्वक्तः न भवति इति चेत् न भाक्तत्वात् । इष्टाधिकारिणः अनात्मवित्वात् देवानां

भोगोपकरणत्वेन इहामुत्र च वर्तते । तस्मात् भूतसूक्ष्मैः सम्परिष्वक्तः एव जीवो गच्छति इति अधिकरणार्थः ।

**माध्वरीत्या** -

शरीरान्तरप्रतिपत्तौ भूतपरिष्वक्त एव गच्छति पञ्चाग्निविषयकप्रश्ननिरूपणाभ्याम् । अपामेव देहे भूयस्त्वं, पुराणेषु तथा प्रसिद्धिः । अतः तन्नाम्ना पुरुषाणां व्यपदेशः । प्राणैःसह भूतान्यपि सन्तीति भाल्लवेयश्रुतेः । भागतः अग्न्यादिप्राप्तेः न विरोधः । अग्न्यादिगतिः प्रत्यक्षतः श्रूयते इति चेत् न भूतैश्चरति इति श्रुतेः । छ्वअपामसोमम्छ्व इति सोमयागेन मुक्तिःश्रूयते । भवता तु ङ्गिदेहभङ्ग एव मुक्तिरुच्यते तन्नेति चेत् न भागतः अमृतत्वं वर्तते । कृतस्य कर्मणो भोगेन क्षयः मुक्तिरिति चेत् छ्वन केवं कर्मणां भोगेन क्षय एव न विद्यतेछ्व इति शास्त्राणामभिप्रायः इति । अस्य विमर्शः एवं भवति ।

शाङ्करभाष्ये अपां भूयस्तं न सम्यक् समर्थितम् । चतुर्थसूत्रे भाक्तत्वात् इत्यत्र गौणत्वात् इत्यर्थ उक्तः । सप्तमेऽपि सूत्रे भाक्तशब्दस्य अप्रधानमित्येव अर्थ आश्रितः ।

रामानुजमते तु भूयस्त्वात् इति द्वितीयसूत्रस्य त्रिवृत्करणात् इति भूयस्त्वे त्रिवृत्करणत्वस्य हेतुत्वमुक्तम् । वस्तुतस्तु तूयस्त्वं न भवति समानत्वं भवति । अग्न्यादिगतिश्रुतेरर्थः रामानुजीये न विवृतः । शाङ्करे तु असमीचीन एव अर्थः उक्तः । भाक्तत्वमित्यस्य गैणत्वमित्यर्थः न क्वचिदपि श्रूयते । शाङ्करभाष्ये सप्तमसूत्रे अनात्मविदां जीवानां देवानां लक्षणत्वमुक्तम् । साधनविचारे प्रस्तुते जीवस्य भूयस्त्वं कथं प्रस्तुतं भवति इति न ज्ञायते ।

**तथा च माध्वरीत्या अधिकरणार्थः एवं भवति** –

लोकव्यवहारीत्या मरणमित्युक्ते देहवियोगः जीवस्य । न भूतवियोगः । वेदेषु मरणमित्युक्ते सर्वात्मना पञ्चभूतवियोगः । मुक्तौ पञ्चभूतसंयोगः बन्धकत्वेन नास्ति । भूतसंयोगः जीवस्य, देहवियोगेऽपि वर्तत इति ज्ञापयितुम् आपः पुरुषवचसो भवन्ति इति उपनिषदुक्तिः । पुरुषे इन्द्रियाणि इन्द्रियमानिनो देवान् गच्छन्ति इति वेदोक्तेः गौणत्वं नास्ति कुत इति चेत् भूतानि इन्द्रियैः सह विभक्तानि भवन्ति । देवान् जीवश्च अनुगच्छन्ति । अपाम सोमम् अमृता अभूम इति श्रुतौ सोमयागानन्तरं या मुक्तिः सा भागतः । सर्वथा मुक्तिस्तु ज्ञानादेव इत्यर्थः भवति ।

अनेन देहात्मैक्यनिरासः कुतः बह्वायाम इति ज्ञायते । गीतायां साधनार्थमिति परोक्षतया भण्यते । यतो हि गीतायाम् अष्टमेऽध्याये –

अन्तकाले च मामेव स्मरन्मुक्त्वा कळेबरं ।
यः प्रयाति स मद्भावं याति नास्त्यत्र संशयः ॥
यं यं वाऽपि स्मरन् भावं त्यजत्यन्ते कळेवरम् ।
तं तमेवैति कौन्तय सदा तावभावितः ॥ [5] इति ।

अत्र अन्त्यको नारायणं स्मरन् कळेबरं यः मुञ्चति सः मावं गच्छति इति देहात् उत्क्रान्तिरुक्ता । सदा तावभावित इति विष्णुभक्तिः आवश्यक इत्यप्युक्तम् । तत्र इन्द्रियाणां गमनं भवति उत न, इति प्रश्नः भवति । एतत्प्रश्नस्य बीजम् एवं भवति । इन्द्रियाणि संस्कारवन्ति वा न वा । यदि संस्कारवन्ति मृतस्य केरळीयस्य पञ्जाबप्रान्तजनने मळयाळ संस्कारः कुतो न दृश्यते । यदि न संस्कारः तर्हि कुतः स्वाभाविक प्रवृत्तिः इति ।

**उपसंहारः (Conclusion)**

अतः ब्रह्मसूत्राणि गीतया सह पठितव्यानि भवन्ति । सूत्रेष्वस्पष्टं प्रमेयं गीतायां विवृतं द्रष्टव्यम् । तथा गीतायामस्पष्टं प्रमेयं सूत्रेषु विवृतं द्रष्टव्यम् ।। इति शम्

**सन्दर्भ सूची**


1. Zend Avesta
2. भगवद्गीता - २-२०
3. ११-११-०८
4. २-१८
5. ८-५